Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 1 | ISSN : 2581- 6306

# सृष्टिक्रमः विकासः वैज्ञानिक परिशिलनम्



डॉ. मुकेश कुमार डागर (धर्माचार्यः)
प्राचार्य
सिद्धि विनायक कॉलेज
(सीकर), राजस्थान

## सृष्टिक्रमः विकासः वैज्ञानिकश्च

**Article Info**
Volume 4, Issue 1
Page Number : 150-153

**Publication Issue :**
January-February-2021

**Article History**
Accepted : 16 Jan 2021
Published : 30 Jan 2021

सृष्टिविषयेऽपि अनेके विचाराः दृष्टिपथमागगच्छन्ति । प्राचीनो विचारः ब्रह्मणः सकाशात् सृष्टिरियं समुत्पन्ना। नवीनः विचारः विद्युत कणानां (Electron) सृष्टौ योगदानम्। साख्यं ब्रूते पुरूषेण सह प्रकृत्ति रस्याः सृष्टेः कारणभूता । अन्तिमः विचार: धन-ऋणयोः विद्युत्कणयोः सामीप्येन सृष्टिरियं प्रवर्तिता यथा प्रतिपादयति विश्वेश्वरः -

"ब्रह्मणास्तु समुत्पन्नं जगदुक्तं पुरातनैः।
नव्या विद्युत्कणोत्पनं मन्यते तदसंशयम्॥
सांख्ये पुरूष सान्निध्यात् प्रकृतिः सृष्टिकारणम्।
तथा धनऋणाणूनां सान्निध्यं नूतने मते" ॥[1]

ऋषीणां मते इन्द्रियातीतं ब्रह्म भवति यत्र अस्माकं स्थूलानीन्द्रियाणि शन्तुं न शक्नुवन्ति । अद्यतनीयः वैज्ञानिक: यां शक्तिं मनुते सा माया ज्ञातव्या। सा शक्तिः सर्वत्राकाशे, पृथिव्यां, सूर्ये, विद्युति विद्यमानास्ति। जगतः कारणं ब्रह्म माया चतस्य ब्रहमणः शक्तिरूपा वेदादौ प्रोक्ता वर्तते। तन्मतं विश्वेश्वर स्मृतावपि समधिगतम्।
ज्ञानेन तस्य ज्ञानं भवति।

वैज्ञानिकः सर्गः -

अस्य ब्रह्माण्ऽस्य रहस्यं ज्ञातुं न शक्यते । अस्मिन् अनन्त सौरमण्डलानि कणानिव दिव्यन्ति । तस्मिन् ब्रहमाण्ऽरूपसागरे कुण्डलाकृतिः भगवान् शेषनागः अशोभत तत्रैव मध्य मध्याशक्तिः (Central Power) भगवान्नारायणः सुष्वाप तथा तस्मिन् नारायणे समस्तं चरोचरं जगत् निमग्नमासीत् अनन्तरं भगवान् नारायणः इच्छां चकार 'एकोऽहं बहुस्याम' अनयाभावनया पुनः जागराञ्चकार ।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

तस्मिन्क्षणे गतिरूपन्ना जाता तस्मात् द्वावनति, तत्वानि (Elements) जातानि। तेजः तत्वन्नास्ति प्रत्युत शक्ति (Energy) रस्ति । आकशोऽपि तत्वार् भिन्नः यथा चाह विश्वेश्वरः –

"शक्ति स्वरूपं तेजोऽस्ति हयाकाशस्तत्वतोऽपरः ।

वैज्ञानिक मतमिदं संक्षेपेण मयोदितम" ।। [2]

आदौ पृथिवी इयं सूर्यमण्डलात् पृथक्जाता तस्मिन् समये अंगारादपि अधिक प्रतप्तेयं पृथीवीबभूव । अनन्तरं अनन्तवर्षाणि व्यतीतानि पुनश्च जलमध्ये जीवाः समुत्पेदिरे ततश्च पंकमध्ये जीवानामुतपत्तिः अन्ते सुशीतलेयं पृथिवी जाता तदुपरि विविधाः जीवाः प्रकल्पिताः तेषामपि क्रमः अयमस्ति- सर्वप्रथमं एक कोषकीयः जीवः प्रादुर्बभूव शनैः शनैः बहुकोषीयाः प्राणिनः बभूवुः । अत्र प्रतीयते डार्बिन महोदयस्य विकासवादस्य सिद्धान्तः । यथा जीवस्य (मानवस्य) जीवनस्तरं विकसति तथैव सृष्टौ अनेके जीवाः कल्पयन्ते तत्र स्वभावात् एव नवीनः उत्पद्यते । संसर्गवशात् अथवा यत्किमपि कारणं स्यात विकासः हासश्च स्वतएव भवतः।

रेऊ महोदयः संसूचयति चीनदेशे यत् मानवस्य कपालं खननमाध्यमेन प्राप्तं तस्य वैज्ञानिकं साक्ष्यं दश लक्षवर्षमनुमीयते तथैव जावा (देशस्यनाम) देशे प्राप्तस्य कपालस्यायुः पादोनपञ्चलक्षवर्ष कल्पयते । जर्मन देशे प्राप्तस्य कपालस्यकालः लक्षनय वर्ष ज्ञायते अनेन गवेषणेन अनेकानि कपालानि इदानीमपि प्राप्यन्ते । वक्तुं शक्यते यत् सृष्टेः निश्चितः कालः नास्ति न च तथाविधं साक्ष्यमेवास्ति येन निर्धारणं स्यात् । विश्वेश्वर महोदयस्य वचनम् -

"भूगर्भतस्तु यत्प्राप्तं चीनदेशे कपालकम् ।

दशलक्षाणि वर्षाणां तस्यायुरनुयीयते ।।

यवद्वीपोपलब्धस्य कपालस्यायुरूच्यते ।

लक्षपादा दूनमथ वर्षाणां लक्षपञ्चकम् ।।

जर्मन्यधिगतस्यायुस्त्रि लक्षाब्दात्मकं मतम् ।

एवमेवापरे लब्धाः कपालाः प्राक्तना भुवि" ।।[3]

द्वितीयः सर्गविचारः हिरण्यगर्भ सूक्तस्य मतं प्रकाशयति । नारायणात् उत्पन्नात् अण्डविशेषात् (हिरण्याण्डात्) ब्रह्मा प्रादुर्बभूव । ए अण्डः द्विधा विभक्तः । एकेन आकाशः द्वितीयेन च पृथिवी अजायताम्। सिसित्श्रु ब्रह्मणः प्रकाशात् (मनसः) सृष्टिरभवत् ततश्च क्रमानुरोधेन पञ्चतत्वानां विकासः जातः । यथा ऋग्वेदे -

"हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।

सदाधार पृथिवींद्यामुतेमां कस्मै देवाय हविषाविद्येमा ।। [4]

अस्याः परिवर्तितं (विस्तृत) स्वरूपं रेऊस्मृतौ दृश्यते। तत्रापि हिरण्य एयगर्भस्य प्रतिपादनमस्ति -

"नारायणभवाण्डातु प्रादुरासीत्पितामहः।

तदण्डखण्ड युग्मेन द्यावाभूमी बभूवतुः॥

सञ्जज्ञे मनसः सृष्टि ब्रह्मणः स्रष्टुमिच्छतः।

क्रमेण सृज्यमानायामाकाशश्चाभवत्ततः॥

आकाशाद्धि ततो वायुयोस्तेजो जलं ततः।

जलात् पृथ्वी समुत्पन्ना प्राचीनोऽयं क्रमः स्मृतः॥

आकाशस्य गुणः शब्दो वायोः स्पर्शस्तथामतः।

रूपं हि तेजसोऽपां तु रसो गन्धस्तथा भुवः"॥ [4]

आकाशस्य गुणः शब्दः वायोः स्पर्शगुणः तेजसः गुणः रूपं, रस गुणकं जलं गंध गुणा च पृथ्वी। पञ्चज्ञानेन्द्रियाणि पञ्च च कर्मेन्द्रियाणि सन्ति। ज्ञानेद्रियैः स्पर्शादि गुणानां ग्रहणयुक्तम्। त्रिगुणात्मियं प्रकृत्तिः। तत्र त्रयेगुणाः संघीभूताः सन्ति तथा रजोगुणेन च सृष्टिः। यद्यपि त्रिभिः गुणैरेव सृष्टिः स्वीक्रियते परन्तु 'रजो रागात्मकं विहि। इति वचनानुसारं रागः अत्रैव भवति येन प्रेरितो भूत्वा सृष्टिरियं विकसति। रजोगणस्य स्वभावचिन्तन वेलायां सांख्यकारिकायां ईश्वरकृष्णः प्रतिपादयति -

"इष्टमुपष्टम्भकं चलं च रजः"।[5]

सत्व लघु प्रकाशकम्। गुरूवरणकं तमः। यद्यपि एते साम्यावस्थायां सृष्टः प्राक् भवान्त अनन्तरं च स्वभाववैषभ्यात् गुणेषु संघर्षः भवति सृष्टि श्चोत्पद्यते। सांख्यस्य अयं क्रमः वर्तते -

"प्रकृते म हांस्ततोऽहंकारः ततोगणाश्चषोडशकः।

तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥ [6]

दुलर्भ सृष्टि विज्ञानं वर्तते। अस्यरहस्योद्घाटन नैव भवति। अनेकेवादाः सृष्टिसम्बन्धिनः सन्तिः। सर्वत्र शास्त्रस्य उपनिषदः प्रमाणमुपलभ्यते। रेऊमहोदयेन बहूनिमतानि प्रतिपादितानि। श्रीमतः वैशिष्ट्यं सर्वेषु प्रकरणेषु दृश्यते। नवीनतमं वैज्ञानिक तथ्यम् अपि वर्णनक्रमे तेन न विस्मर्यते। अन्ते च रेऊमहोदयस्य श्लोकः उदाहियते -

"सत्वं रजस्तम इति गुणास्तु प्रकृतेस्त्रयः।

मिथो मिश्रा इमे सृष्टि हेतवो रजसेरिताः"॥[7]

सन्दर्भग्रन्थाः –

1. विश्वेश्वर स्मृतिः प्रथमोऽधिकारः २२,२३. श्लोकाः
2. विश्वेश्वर स्मृतिः प्रथमोऽधिकारः ५१
3. विश्वेश्वर स्मृतिः प्रथमोऽधिकारः ८२-८४ श्लोकाः
4. ऋग्वेदः
5. विश्वेश्वर स्मृतिः प्रथमोऽधिकारः ६०-६३ श्लोकाः
6. सांख्यकारिका
7. विश्वेश्वर स्मृतिः प्रथमोऽधिकारः ६७ श्लोकाः